पत्र१०

१आत्मनमंदारस्तोत्रप्रारभ॥

आत्मन्दारस्तोत्र . पत्र २१

यामुनाचार्य. सम्पूर्ण संवत- 1918

11"X5"

1060

प्र०

१ श्रीमते रामानुजाय नमः स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहं स्तोत्रयामा

२ स योगीन्द्रस्तं वंदे यामुनाह्वयं ॥१॥ नमो नमो यामुनाय यामुनाय नमो नमः

मु३ नमो नमो यामुनाय यामुनाय नमो नमः ॥२॥ नमो यामुनपादाब्जरेणुभिः

पावितात्मने विदिताखिलवेद्याय गुरवे विदितात्मने ॥३॥ नमोऽचिंत्या

द्भुताक्लिष्टज्ञानवैराग्यराशये नाथाय मुनये गाधभगवद्भक्तिसिंधवे ॥४॥

तस्मै नमो मधुजिदंघ्रिसरोजतत्त्वज्ञानानुरागमहिमातिशयान्तसीम्ने

नाथाय नाथमुनयेऽत्र परत्र चापि नित्यं यदीयचरणौ शरणं मदीयं ॥५॥ राम

१

मुयो नमो परिमिताच्युतभक्तितत्वज्ञानामृताब्धिपरिवाहशुभैर्वचोभिः
लोकेवतीर्णपरमार्थसमग्रभक्तियोगायनाथमुनयेयमिनां
वराय ॥६॥ तत्वेनयश्चिदचिदीश्वरतत्स्वभावभोगापवर्गतदुपायगती
रुदारः संदर्शयन्निरमिमीतपुराणरत्नं तस्मैनमोमुनिवरायपराशराय ।७
मातापितायुवतयस्तनयाविभूतिः सर्वंयदेवनियमेनमदन्वयानां आ
द्यस्यनः कुलपतेर्वकुलाभिरामं श्रीमत्तदंघ्रियुगलंप्रणमामिमूर्ध्ना ८
यन्मूर्ध्निमेश्रुतिशिरःसुचभातियस्मिन्नस्मन्मनोरथपथः सकलः स

२ मेतिस्तोष्यामिनः कुधनंकुलदैवतंतत्पादारविंदमरविंदविलोचनस्य ९
तत्वेनयस्यमहिमार्णवसीकराणुः शक्योनमातुमपिसर्वपितामहाद्यैः क
र्तुंतदीयमहिमास्तुतिमुद्यतायमह्यंनमोस्तुकवयेनिरपत्रपाय १० यद्वा नउ
श्रमावधियथामतिवाप्यशक्तः स्तौम्येवमेवखलुतेपिसदास्तुवंतः वेदा
श्चतुर्मुखमुखाश्चमहार्णवांतः कोमज्जतोरणुकुलाचलयोर्विशेषः ११
किंचैषशक्त्यतिशयेनचतेनुकंप्यः स्तोतापितुस्तुतिकृतेनपरिश्रमेण
तत्रश्रमस्तुसुलभोममंदबुद्धेरित्युद्यमोयमुचितोममचाब्जनेत्र १२

॥ २

नमो यामुनपादाब्जरेणुभिः पावितात्मने विदिताखि
लवेद्याय गुरवे विदितात्मने २

ब्रह्मणो रूपं प्राप्नुयुस्ते प्रत्यगात्मनः। प्राप्नु पापं फलं शप्तेस्तथाप्राप्तिविरोधि च वदंति सकलावेदाः सेतिहासपुराणकाः। मुनय
श्च महात्मानो वेदवेदांतवेदिन इति यो योगींद्रः श्रीमालमंदारूनामनारायणभक्तिपरायणं सुदुर्ग्रहं गृहीतुमशक्यं त्रय्यंता
र्थं वदांतार्थं वेदांतार्थमिति वेदास्त्रयस्त्रयी त्यमरः। इह लोके सर्वेषां ब्रह्मक्षत्रियवैश्यशूद्रब्रह्मचारी। गृहस्थवानप्रस्थयतीनां
स्वादयन् स्वादु कुर्वन् संस्तोत्रयामास तं यामुनाह्वयं। यामुनमुनिमित्याह्वयं नामधेयं यस्य तं श्रीमालमंदारं वंदे नमस्करोमि ॥२॥

स्वादयन्निह सर्वेषां त्रय्यंतार्थं सुदुर्ग्रहं। स्तोत्रयामास योगींद्रस्तं वंदे यामुनाह्वयं ॥२॥ नमो नमो यामुनाय
यामुनाय नमो नमः। नमो नमो यामुनाय यामुनाय नमो नमः ॥३॥ नमोऽचिंत्याद्भुताऽक्लिष्टज्ञानवैराग्यरा
शये। नाथाय मुनयेऽगाधभगवद्भक्तिसिंधवे ॥४॥ पुनरपि यामुनमुनिं नमस्करोति नमो नमो नमस्करोति। अचिंत्याद्भुता
क्लिष्टज्ञानवैराग्यराशये। अचिंत्यस्याचिंतितुमशक्यस्य अद्भुतस्य आश्चर्यस्य अक्लिष्टस्य क्लेशरहितस्य चिदचिदीश्वराः चिदिति
जीवः। अचिदिति देहादिसमस्तप्रपंचः ईश्वरः इति श्रीमन्नारायणः इति तत्त्वत्रयमयस्य ज्ञानस्य वैराग्यस्य च राशये सीम्ने अगाधभग
वद्भक्तिसिंधवे अगाधाया अमेयाया भगवतः। षड्गुणैश्वर्यस्य श्रीमन्नारायणस्य षड्गुणाश्चग्रंथांतरे प्रतिपादिताः भद्रे। तल्लधा

॥ श्री॰ मं॰ ॥ रावरविच्छिन्नस्मृतिसंतानरूपायाः सिंधवे समुद्राय मुनये मननशीलाय मननं नाम युक्तिभिरनुचिंतनं नाथाय श्रीमन्नाथमुनये नमः।
यदीयचरणौ यदीयौ श्रीमन्नाथमुनिसंबंधिनौ चरणौ पादौ अत्र च स्वरूपनिरोधायिन्यामस्यां लीलाविभूत्यां परत्र च स्वरूपप्रकाश
॥२॥ के परमपदे च नित्यं सततं मदीयं मत्संबंधि शरणमुपायः रक्षकमित्यर्थः। मधुजिदंघ्रिसरोजतत्वज्ञानानुरागमहिमाति॥४॥श
यांतसीम्ने मधुर्नाम कश्चिद्दैत्यस्तं जयतीति मधुजित्। श्रीकृष्णः तस्यांघ्री पादावेव सरोजे कमले तयोस्तत्वज्ञानस्य अनुराग
स्य च भक्तेर्महिम्नः प्रभावस्य च अतिशयस्याधिक्यस्यांतसीम्ने। अवधिभूताय नाथाय स्वामिने तस्मै नाथमुनये नमस्ते पुनर्नाथमुनि

तस्मै नमो मधुजिदंघ्रिसरोजतत्वज्ञानानुरागमहिमातिशयान्तसीम्ने। नाथाय नाथमुनयेऽत्र परत्र चापि नि
त्यं यदीयचरणौ शरणं मदीयं ॥४॥ भूयो नमोऽपरिमिताच्युतभक्तितत्वज्ञानामृताब्धिपरिवाहशुभैर्वचोभिः
लोकेऽवतीर्णपरमार्थसमग्रभक्तियोगाय नाथमुनये यमिनां वराय ॥५॥ नमस्करोमि अपरिमिताच्युतभक्तितत्वज्ञा

नामृताब्धिपरिवाहशुभैः अपरिमितायाः परिमाणरहितायाः। अच्युतस्य च्युतिरहितस्य श्रीमन्नारायणस्य भक्तेरविच्छिन्नभक्तेस्तत्वज्ञान
यथार्थज्ञानस्य स्य अमृताब्धेरमृतसागरस्य परिवाहः। तडागोभयसंगायाः अधिकजलनिस्सारणार्थं कृतः। निस्सारणविशेषः। तद्वच्छुभैर्मणीयैर्व
चोभिः श्रीसूक्तिभिः लोके भुवने अवतीर्णः परमार्थो यथार्थो भक्तियोगो यस्य तस्मै यमिनां यमो येषां
॥ यमिनो यमिनः। अतश्चनिष्ठनादिति इनिप्रत्ययः। यमाः श्रीभागवते एकादशस्कंधे चोक्ताः अहिंसा

सत्यमस्तेयमसंगो ह्रीरसंचयः। आस्तिक्यं ब्र
ह्मचर्यं च मौनं स्थैर्यं क्षमाभयमिति तेषां यामि
नां वराय श्रेष्ठाय नाथमुनये भूयः पुनर्नमः ॥५॥

॥ आ. मं. ॥ श्रीयामुनमुनिः ॥ इराटकोपसूरिणः ॥ पादयुगलं नमस्करोतीति यदेव श्रीपादयुगलं मेव नियमेन मदन्वयानां महद्भराजातानां मां पितामह ताजनती
॥ ३ ॥ नकः ॥ युवतयः स्त्रियः ॥ तनयाः ॥ पुत्राः विभूतिरैश्वर्यमिति सर्वं समस्तं मम भूरिति शेषः ॥ आद्यस्य प्रथमाचार्यस्य नोऽस्माकं कुलपतेः कु
लस्वामिनः ॥ शठारेर्वकुलाभिरामं वकुलैरभिरामं रम्यं श्रीमत् श्रीवैष्णवसंपत्समेतं तदंघ्रियुगलं पादयुगलं मूर्ध्ना शिरसा प्रणमामि
वंदे ॥ १ ॥ अथ यामुनमुनिः यन्मूर्ध्नि इति आरभ्य स्तोत्रसमाप्तिपर्यंतं नारायणवर्णनाद्यनेकप्रकारेण वर्णयति यच्छ्रीपा

माता पिता युवतयस्तनया विभूतिः सर्वं यदेव नियमेन मदन्वयानाम् ॥ आद्यस्य नः कुलपतेर्वकु
लाभिरामं श्रीमत्तदंघ्रियुगलं प्रणमामि मूर्ध्ना ॥ १ ॥ यन्मूर्ध्नि मे श्रुतिशिरस्सु च भाति यस्मिन्नस्म
न्मनोरथपथस्सकलस्समेति स्तोष्यामि नः कुलधनं कुलदैवतं तत्पादारविंदमरविंदविलोचनस्य ॥ २ ॥

दारविंदं मे मम मूर्ध्नि शिरसि च श्रुतिशिरस्सु च वेदांतेषु च भाति प्रकाशते ॥ यस्मिन् पादारविंदे सकलः समस्तोऽस्मन्मनोरथपथः म
ॐ: ममनोरथस्य पन्था मार्गः ॥ ऋक्पूः पथामानक्षे इत्यकारांतः ॥ समेति संगच्छति मनोऽस्माकं कुलधनं वंश्य ॥ मूलधनं कुलदैवतं वंशपरंपराग व
तदेवतं ॥ अरविंदविलोचनस्य अरविंदवल्लोचने यस्य तस्य पुंडरीकाक्षस्येत्यर्थः ॥ तत्पादारविंदयुगलं पादपद्मयुगलं स्तोष्यामि ॥ २ ॥

श्रीयामुनाचार्यः॥ श्रीविष्णुपुराणनिर्माणकर्तारं पराशरं नमस्करोतिनुवंः॥ श्रेष्ठः श्रीपराशरः चिदचिदीश्वरतत्स्वभावभोगापवर्गत
दुपायगतीश्चिज्जीवः अचिद्देहाद्यचेतनवर्गः॥ ईश्वरः श्रीमन्नारायणः चिच्चाचिच्चेश्वरश्च चिदचिदीश्वराः॥ तेषां चिदचिदीश्वराणां स्व
भावाः गुणास्तानुभोगः॥ सुखानुभवोऽपवर्गो मोक्षः॥ भोगश्चापवर्गश्च भोगापवर्गौ तयोरुपाया भगवद्गीतासु अमानित्वमदंभित्वमहिंसा
क्षांतिरार्जवं आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः इंद्रियार्थेषु वैराग्यमनहंकार एव च॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं अ

तत्त्वेन यश्चिदचिदीश्वरतत्स्वभावभोगापवर्गतदुपायगतीरुदारः॥ संदर्शयन्निरमिमीत पुरा
णरत्नं तस्मै नमो मुनिवराय पराशराय॥ ६॥

॥ आसक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु॥ नित्यं च समचित्तत्वमिष्टानिष्टो
पपत्तिषु॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी॥ विविक्तदेशसेवित्वमरतिर्जनसंसदि॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं इति ग्रंथ त्व
विस्तरभयात् भगवद्गीतार्थो न लिख्यते गतिरर्चिरादिधूममार्गः भगवद्गीतासूक्तः अग्निर्ज्योतिरहः शुक्ल इत्यादि श्लोकचतुष्टयेन ग्रंथ विस्तर
भयादर्थो न लिख्यते तत्त्वेन यथार्थेन संदर्शयन्॥ उपदिशन्॥ पुराणरत्नं पुराणश्रेष्ठं॥ विष्णुपुराणं रत्नं श्रेष्ठमणाविति विश्वः निरमिमीत नि
॥र्मितवान् तस्मै मुनिवराय मुनिश्रेष्ठाय पराशराय अनयेन नमः॥ ६॥

अथाचिंत्यमहिमानंश्रीहरिं स्तोतुमशक्तोहमितिभंग्यंतरेणाहयस्यश्रीमन्नारायणस्यमहिमार्णवशीकरणः ॥ महिमाप्रभावएवा र्णवस्समुद्रस्तस्यशीकरोजलकणः ॥ शीकरोंबुकणाम्मृतइत्यमरः ॥ अप्यर्थे पि उक्तोपिशर्वपितामहाद्यैः शर्वः शरशिवः ॥ पितामहोब्रह्मा तावाद्यौयेषांतैर्देवैस्तत्त्वेनयथार्थ्येनपरिमातुंनशक्यः ॥ तदीयमहिमस्तुतिंतदीयस्यश्रीमन्नारायणस्यसंबंधिनोमहिम्नःप्रभावस्यस्तु तिंस्तोत्रंकर्तुमुद्यतायाशुद्धतायनिरपत्रपायनिर्लज्जाय ॥ लज्जासापत्रपान्यितास्त्रीत्यमरः ॥ कवयेमह्यंनमोस्त्वित्यमन्वयः ॥ पितामहा

समुद्रपानसमये अहस्तं यथातत्थाम्बरयोः
परमाणुपर्वतयोः कोविशेषइतियावत ॥१०॥

तत्त्वेनयस्यमहिमार्णवशीकराणुःशक्योनमातुमपिशर्वपितामहाद्यैः ॥ कर्तुंतदीयमहिमस्तुतिमुद्य
तायमह्यंनमोस्तुकवयेनिरपत्रपाय ॥९॥ यद्वाश्रमावधियथामतिवाप्यशक्तःस्तौम्येवमेवखलुतेपि
सदास्तुवंतः ॥ वेदाश्चतुर्मुखाश्चमहार्णवांतःकोमज्जतोरणुकुलाचलयोर्विशेषः ॥१०॥ ॥१०॥

मुख

हिभिः स्तोतुमशक्यंभगवन्महिमानमहंमूढः कथंस्तोष्यामीति ॥ आत्मानंनिंदितवानित्यर्थः ॥९॥ अथयामुनमुनिः श्रीमन्नारायणस्तुत्ये अहमसमर्थइत्यात्मानंविनिंद्यास्मिन्श्लोके यथाकथंचिदात्मानःस्तोतुमधिकारंसंपादयति ॥ अशक्तोऽसमर्थोपिभृशंस्तोष्येहं यद्वा अथवा श्रमावधिश्रांतिपर्यंतंवायथामतिवामतिप्रकाशपर्यंतंवास्तोष्यामिवर्तमानसामीप्येवर्तमानवद्वेतिलट्सदास्तुवंतः ॥ चतुर्मुखाः ब्रह्मादयोदेवाःवेदाः ॥ ऋग्यजुःसामाथर्वणाश्चैवमेवैतावन्मात्रमेवनतथाहिमहार्णवस्यांतःमहतोऽधिकस्यार्णवस्यसमुद्रस्यांतः ॥ मज्ज तोरणुकुलाचलयोः परमाणुपर्वतयोः कोविशेषः कश्चिदपिविशेषोनास्तीत्यर्थः ॥

॥ स्ता० सं० ॥ दूरस्थानीं स्तोतुमधिकारोऽस्तीति प्रकारान्तरेणाह ॥ किंच हे अम्बुजनेत्र पुंडरीकाक्ष । एष यः । स्तोता स्तोत्रकर्त्ता शक्त्यतिशयेन शक्तेः । सामर्थ्यस्या
तिशयेन अधिको न तेन वानुकंप्यो दयनीयो न अपि तु किं तर्हि तेन स्तोत्रजनितेन परिश्रमेण श्रान्त्यानुकंप्यः तत्र तस्मिन्नर्थे मंदबुद्धेर्मं
॥ ४ ॥ दाल्पा बुद्धिर्यस्य मम मे श्रमः ॥ श्रान्तेः सुलभः तुल्य एष उद्यमः स्तोत्रोद्योगः । मम दासभूतस्य मे उचितोऽनुरूपः ॥ ११ ॥ निरुपाधिकरुणया स

न किं चैष शक्त्यतिशयेन न तेऽनुकंप्यः स्तोतापि तु स्तुतिकृतेन परिश्रमेण ॥ तत्र श्रमस्तु
सुलभो मम मंदबुद्धेरित्युद्यमोऽयमुचितो मम चाब्जनेत्र ॥ ११ ॥ नावेक्षसे यदि ततो भुवना
न्यमूनि नालं प्रभो भवितुमेव कुतः प्रवृत्तिः । एवं निसर्गसुहृदि त्वयि सर्वजंतोः स्वामिन्न
चित्रमिदमाश्रितवत्सलत्वं ॥ १२ ॥ र्वजीववर्गस्य तव सेवकरक्षणं न विचित्रमित्याह हे प्रभो हे स्वामिन् । अमूनि इमा ॥ ९ ॥
नि भुवनानि ॥ नावेक्षसे यदि न पश्यसि तर्हि भवितुमेव नालं न समर्थानि ततः उत्पत्त्यनंतरभाविनी प्रवृत्तिर्व्यापारः । कुतः संभवति नास्तीत्यर्थः
एवमनेन प्रकारेण सर्वजंतोः समस्तजंतुजातस्य निसर्गसुहृदि निसर्गेण स्वभावेन सुहृदि बांधवे अकारणबांधव इत्यर्थः ॥ त्वयि इदमेत
॥ दाश्रितवत्सलत्वं आश्रितेषु भक्तेषु वत्सलत्वं वात्सल्यं न चित्रमाश्चर्यं न भवति विस्मयोऽद्भुतमाश्चर्यमित्य

इदानीं ब्रह्मशिवपुरंदरादयः। श्रीविष्णोरंशा एवेति स्तोति हे नारायण हे। त्वं ईशः षड्गुणविभूतियुक्तः सर्वेश्वरः त्वयि स्वाभाविकानव
धिकातिशयेशितृत्वं स्वाभाविकः स्वभावसिद्धोऽनवधिकोऽपारोऽतिशयः आधिक्यं यस्य तत् स्वाभाविकानवधिकातिशयं परं बहु ईशितुः ई
शितुर्भाव ईशितृत्वं स्वाभाविकानवधिकातिशयं च तत् ईशितृत्वं च तथोक्तं तत् कर्म वैदिको वेदसंबंधी ज्ञानवान् को न मृष्यति न सहते स
र्वोऽपि वेदसंबंधिज्ञानवान् सहत एवेत्यर्थः। तथा चोक्तं नारायणोपनिषदि। नारायणाद्ब्रह्मा जायते। नारायणात्प्रजापतिः प्रजायते ना

स्वाभाविकानवधिकातिशयेशितृत्वं नारायण त्वयि न मृष्यति वैदिकः
कः॥ ब्रह्मा शिवः शतमखः परमः स्वराडित्येतेऽपि यस्य महिमार्णववि
॥ प्रुषस्ते ॥ १२ ॥

रायणाद्रुद्रो जायत इत्यादिना तदेव प्रतिपादयति। ब्रह्मा शिवः शतमखः शतं मखा यस्य स तथोक्त इंद्रः परमः स्वराट् मुक्तजीवः इत्येतेऽपि यस्य
ते तव महिमार्णवविप्रुषः महिमा प्रभाव एवार्णवः समुद्रस्तस्य विप्रुषो बिंदवः पृषन्ति बिंदुपृषतौ पुमांसौ इत्यमरः ॥ १२ ॥ ॥ १२ ॥

॥आ० मं०॥ दूरतांनी भगवतो नितान्तमायमहिमत्वं वर्णयति॥ श्रीयोलक्ष्म्याः। श्रीः कांतिः प्रभा रूपः कः कः परमसत्वसमाश्रयः। परमस्य श्रेष्ठस्य सत्वगु
णस्य समाश्रयो निवासः कः पुंडरीकनयनः पुंडरीके इव नयने यस्य स तथोक्तः। पुंडरीकाक्षः कः पुरुषोत्तमः। पुरुषेभ्यो क्षरपुरुषाक्षर। पुरुषेभ्यो
॥५॥ रुत्तमः। कस्तथोक्तः। कस्तथोक्तं भगवद्गीतासु द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च क्षरः। सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते उत्तमः। पुरु
षस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः। यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः

कः श्रीः श्रियः परमसत्वसमाश्रयः कः कः पुंडरीकनयनः पुरुषोत्तमः कः। क
स्यायुतायुतशतैककलांशकांशे विश्वं विचित्रचिदचित्प्रविभागवृत्तं ॥ १४ ॥

पुरुषोत्तम इति ग्रंथविस्तरभयादर्थो न लिख्यते। कस्यायुतायुतशतैककलांशकांशे। अयुतानां दशकोटीनां शतस्य एककायाः। कलाया
अंशकस्य अंशस्य खंडस्य अंशे अंशमात्रे विश्वं सर्वं जगत्। चिदचित्प्रविभागवृत्तं विचित्राणामाश्चर्याणां चितां चितनानामचितामचेतना
नां प्रविभागो विभजने वृत्तं निष्पन्नं भवदेव ॥ १४ ॥ ॥ १४ ॥ ॥ १४ ॥

चि

श्रीमन्नारायणस्य ब्रह्मशंकराभ्यामप्युत्कृष्टत्वं दर्शयति वेदापहारगुरुपातकदैत्यपीडाद्यापद्विमोचनमहिष्ठफलप्रदाने ॥ वेदानामप
पहारो वेदापहारः गुरुपातकं च दैत्यपीडा चादयो यासां तास्तथोक्ताश्च ता आपदश्च तासां विमोचनेन महिष्ठानामतिमहतां फला
नां प्रदानेश्चान्यदुता । कः प्रजापशुपती प्रजाश्च पशवश्च तेषां पती नां ब्रह्मशंकरौ ह्यद्वांतेउक्तः । पतिराह्नः । प्रत्येकमभिसंबध्यते परिपाति
परिपालयति सर्वोकरः । स्वशिरोधृतेन स्वस्यात्मनः । शिरसा मूर्ध्नि धृतेन पादोदकेन पादप्रक्षालकेन श्रीपादतीर्थेन शिवा मंगलस्वरू

वेदापहारगुरुपातकदैत्यपीडाद्यापद्विमोचनमहिष्ठफलप्रदाने ॥ कोऽन्यः प्रजापशुपती परिपाति कस्य
पादोदकेन स शिवः स्वशिरोधृतेन ॥ ५ ॥ त्वां शीलरूपचरितैः परमप्रकृष्टसत्त्वेन सात्त्विकतया प्रबलैश्च
शास्त्रैः ॥ प्रख्यातदैवपरमार्थविदां मतैश्च नैवासुरप्रकृतयः प्रभवंति बोद्धुम् ॥ ६ ॥

पो भवदिति शेषः ॥ ५ ॥ न त्वे
वं विविधगुणसंपन्नं श्रीहरिं तामसाः कथं न सेवंत इत्याशंकायामासुरप्रकृतयो ज्ञातुं न समर्था इत्याह । शीलरूपचरितैः शीलं स्वभावः
शीलं स्वभावमरस्वतीसमेः । रूपाणि दिव्यमंगलविग्रहाणि चरितानि चरित्राणि शीलं च रूपाणि च चरितानि च तैस्तथोक्तैः परमप्र
कृष्टसत्त्वेन परमेणोत्कर्षेण प्रकर्षेण प्रसिद्धेन सत्त्वेन च सात्त्विकतया सत्त्वगुणप्रधानत्वेन च प्रख्यातदेवपरमार्थविदां प्रख्यातं प्रसिद्धं

॥श्री॰ मं॰॥ देवस्य परमार्थं विदन्ति ते तथोक्तास्तेषां पराशरादीनामित्यर्थः। मतैः प्रबलेऽधिकेः। शास्त्रेऽभ्यासप्रवृत्तयः। आसुरीप्रकृतिर्येषां ते हि
याः॥ पुंवत्स्त्र्यादिना पुंवद्भावः। क्रूरकर्माण इत्यर्थः। त्वां भवन्तं वोढुं ज्ञातुं न प्रभवन्त्येव न समर्था एव। ॥९॥ इदानीं स्थितिस्तुत्या त्रितत्त्वेणोपसंहा
॥९॥ न रपूर्वकं निर्लेपत्वाद्यनेकासाधारणगुणान् भगवतस्सन्तीति भणन्नाह। कस्योदरेत्यादि। हरश्च विरिञ्चिश्च हरवि
रिञ्चिमुखं आदिर्यस्य स तथोक्तः प्रपञ्चः तिष्ठतीति शेषः। कस्य नाभेः सकाशात् प्रपञ्चोऽजनिष्ट च जातं च मं प्रपञ्चं को रक्षती पालय

कस्योदरे हरविरिञ्चिमुखः प्रपञ्चः को रक्षतीममजनिष्ट च क
स्य नाभेः। क्रान्त्वा निगीर्य पुनरुद्गिरति त्वदन्यः कः केन चैष
परवानिति शक्यशंकः ॥९॥

तिपुनः भूयः त्वदन्यः। त्वद्भवतोऽन्यः परः कः। प्रपञ्चं क्रान्त्वा आ
क्रम्य निगीर्य कुक्षौ स्थाप्योद्गिरति स्वकीयकलेवरान्निष्क्रम्य बहिर्निस्सारयति केन चैषः प्रपञ्चः परवानिति शक्याशंकाय स्य सः त्व
दन्यस्य कस्य एवंविधसामर्थ्यम्। नास्तीति शंकितः संभावनापि नास्तीति प्रसिद्धमेव ॥९॥ १८ ॥९॥ ॥९॥

नरकत्राणस्य त्वां पश्यंतीत्याह। त्वदनन्यभावाः केचित् उल्लंघितत्रिविधसीमातिशायिसंभावनं ॥ उल्लंघिता अतिक्रांता त्रि
विधा सीमा नो देशकालवस्तुपरिच्छेदाः यस्मात्सा तथोक्ता समानातिशायिन्यधिकाच संभावना यस्य तत्तथोक्तं तव भवतः परि
ब्रढिमस्वभावं परिब्रढिमप्रभुत्वस्य स्वभावं स्वरूपं भवता त्वयापि मायाबलेन मायाबलेन सत्वेन निगुह्यमानं पिहितमप्य निशं संतत पा
विरता तं संततमनिशमित्यमरः पश्यंति ॥ १७ ॥ इदानीं सर्वपदार्थाः श्रीविष्णोरंशा एवेत्याह। यदंडं ब्रह्मांडमस्तीति शेषः। यदंडांतरगोचरं च ब्रह्मां

वि उल्लंघितत्रिविधसीमसमातिशायिसंभावनं तव परिब्रढिमस्वभावं। मायाबलेन भवतापि निगुह्यमानं
पश्यंति केचिदनिशं त्वदनन्यभावाः ॥ १७ ॥ यदंडमंडांतरगोचरं च यद्दशोत्तराण्यावरणानि यानि च गु
णाः प्रधानं पुरुषः परं पदं परात्परं ब्रह्म च ते विभूतयः ॥ १८ ॥ डाभ्यंतरवर्त्तिपदार्थजातं ॥ यानि यद्दशोत्तराण्येकैकस्मा
द्दशगुणितान्यावरणानि ॥ पृथिव्याद्यावरणानि संतीति शेषः ॥ गुणाः सत्वरजस्तमांसि गुणाः सत्वं रजस्तम इत्यमरः ॥ प्रधानं प्र
कृतिः स्त्रियामित्यमरः ॥ पुरुषश्चेतनतत्वसदृशः ॥ तेनैव आत्मा पुरुष इत्यमरः ॥ परं पदं नित्यविभूतिश्च परात्परं श्रेष्ठं ब्रह्म च हि
त्यमंगलविग्रहश्च ते तव विभूतयः ऐश्वर्याणि ॥ १८ ॥ ॥ १८ ॥ ॥ १९

॥ स्ता॰ मं॰ ॥

॥ ७ ॥

इदानीमुक्तगुणाः श्रीविष्णोरेव सन्तीत्याह ॥ हे विभो इत्यध्याहार्यं त्वं भवान् शुचिः परमशुद्धस्वरूपः । मृदुः मार्दववान् दयालुः ॥
दयावान् मधुरो माधुर्यवान् स्थिरः स्थैर्यवान् समः सर्वसमः कृती कुशलः कृतज्ञः कृतसेवाभिज्ञः स्वभावतो निसर्गात् समस्तक-
ल्याणसमस्तानां सर्वेषां कल्याणानाम् अमृतोदधिः क्षीराब्धिरसि त्वत्समोऽन्यो नास्तीत्यर्थः ॥ २० ॥ वेदवाचोऽपि त्वद्गुणावधिं न जानन्ती-

वशी वदान्यो गुणवान् ऋजुः शुचिर्मृदुर्दयालुर्मधुरः स्थिरः समः कृती कृतज्ञस्त्वमसि स्व-
भावतः ॥ समस्तकल्याणगुणामृतोदधिः ॥ २० ॥ उपर्युपर्यब्जभुवोऽपि पूरुषान् प्रकल्प्य
ते ये शतमित्यनुक्रमात् ॥ गिरस्त्वदेकैकगुणावधीप्सया सदा स्थिता नोद्यमतोऽतिशेरते ॥ २१ ॥

त्याह ॥ हे प्रभो इत्यध्याहार्यं ॥ गिरो वेदवाचः । त्वदेकैकगुणावधीप्सया भवत एकैकेषां गुणानामवधिं तत्तत्स्वरूपं प्राप्तुमिच्छ या
या ॥ अब्जभुवो ब्रह्मण उपर्युपर्युद्दमद्द पुरुषान् प्रकल्प्य कल्पयित्वा ते ये शतमिति शतं मानुषा आनन्दा इत्यनुक्रमात् सदा सन्त ते ये
तं स्थिता नास्ति रं नि उद्यमं त उद्योगान्नातिशेरते ॥ अतिक्रमणसमर्था न भवन्ति ॥ २१ ॥ ॥ २१ ॥ ॥ २१ ॥

त्वद्भक्तानां त्वत्संकल्पानुसारिणस्सर्वे विशेषाः॥ संज्ञीत्याह। हेजगन्नाथेत्यध्याहार्यं त्वदाश्रितानां त्वामाश्रितानां जगदु
द्भवस्थितिप्रणाशसंसारविमोचनादयः। जगत उद्भव उत्पत्तिः स्थितिरवस्थानं प्रणाशो लयः। संसारविमोचनं मोक्षः। तेषां द्वंद्वसमासः
तान्यादयो येषां ते तथोक्ता लीलाक्रिया भवंति वैदिकाश्च वेदोक्तविधयश्च त्वदीयगंभीरमनोनुसारिणः। त्वदीयगंभीरमनश्श्रित
मनुसरंतीति तथोक्ता भवंतीति शेषः॥२२॥ इदानीं भगवंतं नमस्करोति॥ वाङ्मनसातिभूमये वाङ्मनसयोर्वाङ्मनसे। अचतुरेत्यादिना
अच्प्रत्ययांतो निपातः। तयोरतिभूमये। अगोचराय नमो नमः। भक्त्यतिशयेन पुनर्नमस्करोति। ननु कथं भक्तास्स्तुवंति ध्यायंति चेत्या

त्वदाश्रितानां जगदुद्भवस्थितिप्रणाशसंसारविमोचनादयः। भवंति लीलाविधयश्च वैदिकास्त्वदीयगं नमो
भीरमनोनुसारिणः॥२२॥ नमो नमो वाङ्मनसातिभूमये नमो वाङ्मनसैकभूमये॥ नमो नमोनंतमहाविभू
तये नमो नमोनंतदयैकसिंधवे॥२३॥ कांक्षायामाह॥ वाङ्मनसैकभूमये वाङ्मनसयोरेकस्मै मुख्याय भूमये स्थानाय

त्मये॥ नमो नमोनंतमहाविभूतये अनंता अपरिच्छेद्या महती विभूतिरैश्वर्यं यस्य तस्मै विभूतिर्भूतिरैश्वर्यमित्यमरः॥ नमो नमो
तदिंदि समश्वर्य्यं। कथं दीनानकिंचनान् भक्ताननुगृह्णातीत्याकांक्षायामाह॥ अनंतदयैकसिंधवे। अनंता यादयायाः एकस्मै मु
ख्याय सिंधवे समुद्राय नमो नमः। संपूर्णैश्वर्यापि निरुपाधिकापरिमितदयासमुद्रत्वात् भक्ताननुगृह्णातीति भावः॥२३॥

॥ स्त्रा॰ मं॰ ॥ इदानीं कर्मज्ञानभक्तिमार्गाननुसंधातुमसमर्थस्य मे प्रपत्तिरेव गरीयसी गतिरित्याह हे शरण्य शरणप्राप्तुंयोग्य श्रीहरे अहमित्यध्या

हार्यं धर्मनिष्ठः धर्मैककर्मणि निष्ठा स्थितिर्यस्य स तथोक्तो नास्मि न भवामि । आत्मवेदी आत्मानं परमात्मानं वेत्तीत्यात्मवेदी च न भवा

॥ ८ ॥ मि त्वच्चरणारविंदे तव श्रीपादारविंदे भक्तिमान् न भवामि । अकिंचन उपायशून्यः अनन्यगतिः न विद्यते अन्या गतिर्यस्य स तथो

व क्तोऽगत्यंतरः शून्य इत्यर्थः । त्वत्पादमूलं तव भगवतः श्रीपादमूलं शरणमुपायं प्रपद्ये प्राप्नोमि । न तु श्रुतिस्मृतिपुराणेतिहासेषु कर्मज्ञान

न धर्मनिष्ठोऽस्मि न चात्मवेदी न भक्तिमांस्त्वच्चरणारविंदे । अकिंचनोऽनन्यगतिः शरण्य

त्वत्पादमूलं शरणं प्रपद्ये ॥ २७ ॥

॥ भक्तिमार्गाः प्रसिद्धाः इति महामुनिभिरुक्ताः प्रपत्तिमार्गस्तु कुत्रापि नोच्यते इति के

चिदाक्षिपंति । नान्यगतिप्रपत्तिमार्गोऽपि प्रसिद्ध एव मया तत्र तत्र पुराणेषु प्रणीताः श्लोका विलिख्यंते महाभागवते एकादशस्कंधे

तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनां प्रवृत्तिं च निवृत्तिं च श्रोतव्यं श्रुतमेव च । मामेकमेव शरणमात्मानं सर्वदेहिनां ॥ याहि स

र्वात्मभावेन मया स्या ह्यकुतोभयं इति दशमस्कंधे च कः पंडितस्त्वदपरं शरणं समायात् । भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् । सर्वान्

दत्तिभजतोविदुषोपिकामानात्मानमुपपच्चयापच्चपोनयस्य ॥ श्रीरामायणेच श्रीरामचंद्रेणोक्तं ॥ सकृदेवप्रपन्नायतवास्मीति
चयाचते ॥ अभयंसर्वभूतेभ्योददाम्येतद्व्रतंममेतिकिंचभिवेचनेभगवतार्जुनस्यपरमार्थोपदेशकालेश्रीभगवद्गीतासुचरमश्लो
केनोपदिष्टंसर्वधर्मान्परित्यज्यमामेकंशरणंव्रज । अहंत्वांसर्वपापेभ्योमोक्षयिष्यामिमाशुचइत्येवप्रपत्तिमार्गः शुश्रूषुताएवो
वि क्तः । अथभक्तिमार्गान्तरभूतएवनिष्पत्तिकथं एकादशस्कंधेश्रीभगवताकर्मज्ञानभक्तियोगाएवनिरूपितास्तथाचोक्तं । योगा
स्त्रयोमयाप्रोक्तानृणांश्रेयोविधित्सया । ज्ञानंकर्मचभक्तिश्चनोपायोन्योस्तिकुत्रचित्इति । ननुप्रपत्तिर्नामशरणागतिःसाकथं
भक्त्यंतर्भविष्यतीत्युच्यतेसप्तमस्कंधेतदुक्तं । श्रवणंकीर्तनंविष्णोः । स्मरणंपादसेवनं अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनं इतिपुं
व सार्पितानविष्णौभक्तिश्चेन्नवलक्षणाक्रियतेभगवत्यद्धातन्मन्येधीतमुत्तमं । आनुकूल्यस्यसंकल्पः । प्रातिकूल्यस्यवर्जनं रक्षिष्यतीतिवि
श्वासोगोप्तृत्ववरणंतथा आत्मनिक्षेपकार्पण्येषड्विधाशरणागतिरिति । तदात्मनिक्षेपमंगीकृत्यइतराणिपंचात्मनिक्षेपस्यअ
ङ्गाङ्गिभावेनषड्विधाप्रपत्तिभक्तेर्मार्गान्तरभूतेतिप्रसिद्धंग्रंथविस्तारभयात्तेषांश्लोकानांव्याख्यानंनलिख्यते ॥ २४ ॥ ॥ २४

॥श्री॰ मु॰॥ इदानीं पापकर्माहं गत्यंतरशून्यस्तव पुरस्तात्क्रंदामीत्याह। हे मुकुंद मुक्तिभूमिप्रदायक। लोके भुवने यन्निंदितं गर्हितं कर्म दुष्कर्मा ॥श्री॥
स्ति तत्कलुषकर्म मया सहस्रशः। सहस्रधा न व्यधायीति न न निहतमिति न कृतमेवेत्यर्थः। द्वौ नञौ प्रकृतिमर्थं गमयत इति समस्त
॥स्ये॥ पापकर्मकारीति भावः। सोहं विपाकावसरे विपाकस्य कर्मविपाकस्यावसरे समये संप्रति इदानीमगतिर्गत्यंतरशून्यस्तव भव ॥श्री॥
तोऽग्रे पुरतः। क्रंदाम्यटामि तस्मादनन्यगतिकं मां परमदयालुस्त्वं पालयेति भावः॥२५॥ नहि त्वदन्यान्पालयामि किं त्वद्दृशाणे

न निंदितं कर्म तदस्ति लोके सहस्रशो यन्न मया व्यधायि॥ सोहं विपाकावसरे मुकुंद क्रंदामि
संप्रत्यगतिस्तवाग्रे॥२५॥ निमज्जतोनंतभवार्णवांतश्चिराय मे कूलमिवासि लब्धः॥ त्व
यापि लब्धं भगवन्निदानीमनुत्तमं पात्रमिदं दयायाः॥२६॥

नेति चेद्धि त्वापयति। हे भगवन् षड्गुणैश्वर्यसंपन्न अनंतभवार्णवांतः अनंतस्यापरिमितस्य भवार्णवस्य संसारसमुद्रस्यांतो
ऽभ्यंतरे निमज्जतो मज्जतो मे गतिहीनाय सारस्येत्यर्थः। चिराय त्वमित्यध्याहार्ये कूलमिव तीरमिव लब्धोसि त्वयापीदानीं दयायाः
करुणायाः। इदं पात्रमनुत्तमं न विद्यते यस्मादुत्तमं तदनुत्तमं। अत्युत्तममित्यर्थः। इदं मद्रूपं वस्तु लब्धं प्राप्तमित्यर्थः। तस्मात्पा १

त्वदीयानामपिदुःखानुभवइतिप्रवादस्तवनोचितस्त्याह। हे नाथ हेस्वामिन्। मम अभूतपूर्वेकाले। अनुभूते किंभावीष्यतीति
वा। अस्तिचेत्सर्वे ममतं सहेसहिष्ये ममदुःखंसहजंहि किंतु। अपितुत्वदंघ्रेःत्वत्सन्निधौशरणागतानां दासानांपराभवस्तिरस्का
रस्तवनानुरूपोनोचितस्तस्मात्वन्महिमानंविचार्यमांपालयेत्यर्थः।२७॥ इदानींत्वयानिरस्तोप्यहंतवपादकमलंनत्यजामीति
चिंतापयति। हेमहेश श्रीहरे निराशकस्यापि निरसितुंशीलमस्यास्तीतिनिराशकोविसर्जकस्तस्यनिराशकस्यापितवभवतः। पादपं

अभूतपूर्वंममभाविकिंवासर्वंसहेमेसहजंहिदुःखंकिंतुत्वदग्रेशरणागतानां॥ पराभ
वोनाथनतेनुरूपः॥२७॥ निरासकस्यापिनतावदुत्सहेमहेशहातुंतवपादपंकजं। रुषा
निरस्तोपिशिशुःस्तनंधयोनजातुमातुश्चरणौजिहासति॥२८॥

कजंश्रीपादारविंदंहातुंत्यक्तुंनाभ्वत्सर्वदानोत्स
हे। नयादिस्तनंधयःस्तनंधयतीतिस्तनंधयः। धेट्पानेइतिधातोः शिशुःरुषाक्रोधेननिरस्तोपिप्रतिषिद्धोपिमातुर्जनन्याश्चरणौपा
दौजातुकदाचिदपिनजिहासतित्यक्तुंनेच्छतिखलु॥२८॥

॥२८॥

॥२८॥

॥ आ॰ मं॰ ॥ भगवत्पादारविंदमकरंदामृतत्वत्तः। कथमन्यदपेक्षत इत्याह॥ हे त्वामिति नित्यधाहार्यं॥ नवभवतोमृतस्यंदिनि सुधास्त्वावि
णि पादपंकजे श्री पादकमले निवेशितात्मा निवेशितस्वात्मा अंतःकरणं येन सतथोक्तो निहितचित्त इत्यर्थः। कथमन्यदपांवल्कर
॥ १० ॥ इत्यपेक्षते नोपेक्षत इत्यर्थः। तथा हि मधुव्रतो भ्रमरो मकरंदनिर्भरमकरंदेन पुष्परसेन निर्भरे संपूर्णे अरविंदे स्थिते सति करावे
कृकस्वार्थकः प्रत्ययः। इक्षु गंधोत्कंडेक्षु कोकिलाक्षेतेक्षुर इत्यमरः। नवीक्षते हि नपश्यति खलु॥ २९॥ हे हर इत्यधाहार्यं त

तवामृतस्यंदिनि पादपंकजे निवेशितात्मा कथमन्यदिच्छति॥ स्थितेरविंदे मकरंदनि
र्भरे मधुव्रतो नेक्षुरकं हि वीक्षते॥ २९॥ त्वदंघ्रिमुद्दिश्य कदापि केनचिद्यथा तथा वापि स
कृत्कृतोंजलिः। तदैव मुष्णात्यशुभान्यशेषतः शुभानि पुष्णाति न जातु हीयते॥ ३०॥

दंघ्रित्वत्पादकमलमुद्दिश्य कदापि यस्मिन्कस्मिन्कालेपि केनचित् येन केनजनेनापि यथा तथा वापि येन केन प्रकारेणापि
सकृदेकवारः कृतांजलिस्तदैव तस्मिन्काल एव अशुभान्यमंगलानि अशेषतो निःशेषं यथा मुष्णात्यपहरति शुभानि शुभक
र्माणि पुष्णाति करोति न जातु कदाचिदपि नही

आर्यामंगलटीका ॥ १० ॥

इदानीं श्रीविष्णुपादकमलभक्त्यमृतसमुद्रबिंदुरपि संसारतापं निर्वाप्य परं सुखमपि ददातीत्याह ॥ त्वच्चरणारुणांबु
जद्वयानुरागामृतसिंधुशीकरः ॥ तव चरणावेवारुणांबुजे तयोर्द्वयं युग्मं तस्मिन् अनुरागो भक्तिः स एवामृतसिंधुः क्षीराब्धिस्तस्य शी
करः ॥ शीकरोंऽबुकणाः स्मृता इत्यमरः ॥ उदीर्णसंसारदवाशुशुक्षणिं ॥ उदीर्णं उज्ज्वलितं संसार एव दवाशुशुक्षणिर्दवाग्निः दवो वनहु
ताशन इत्यमरः ॥ तं क्षणेन क्षणमात्रेण निर्वाप्य शांतिमापाद्य परां श्रेष्ठां निर्वृतिं सुखं प्रयच्छति ददाति इदानीं विष्णुपादकमलं स्त्वा

उदीर्णसंसारदवाशुशुक्षणिं क्षणेन निर्वाप्य परां च निर्वृतिं ॥ प्रयच्छति त्वच्चरणारुणांबुजद्व

धु यानुरागामृतसिंधुशीकरः ॥ ३१ ॥ विलासविक्रांतपरावरालयं नमस्यदार्तिक्षपणे कृतक्षणं ॥ ध

नं मदीयं तव पादपंकजं कदा नु साक्षात्करवाणि चक्षुषा ॥ ३२ ॥ ॥ ३२ ॥

मीत्याह ॥ हे स्वामिन् विलासधाम्ना हार्ये विलासविक्रांतपरावरालयं विलासेन विक्रांताः परिमिताः परेषां ब्रह्मादीनां अपरेषां मिंद्रादीनां
माल्याः लोकाः येन नमस्यदार्तिक्षपणे नमस्यतां प्रणवतां आर्तिः तापः तस्याः क्षपणे निवारणे कृतक्षणं कृतः क्षणः उत्सवो येन तत् मदी
यं मत्संबंधि धनं मूलधनं तव भवतः ॥ पादपंकजं श्रीचरणारविंदं कदा नु कस्मिन् काले चक्षुषा चक्षुरिंद्रियेण साक्षात्करवाणि प्रत्यक्षं करिष्यामि ॥ ३२ ॥

॥ श्री॰मं॰ ॥ द्वंशानीं विष्णुपादकमलं मन्मदाभूषयतीत्याह ॥ हे त्रिविक्रम त्रयो विक्रमाः पादविन्यासा यस्य स तथोक्तस्य संबुद्धिः। शंखरथांगकल्प
कध्वजारविंदांकुशवज्रलांछनं ॥ शंखरथांगं चक्रं कल्पकः कल्पवृक्षः ध्वजः केतुः अरविंदं कमलं अंकुशः वज्रं वज्रायुधमेते [illegible] द्वंद्व र्वा
॥ ११ ॥ समासः ॥ एतानि लांछनानि चिह्नानि यस्मिन् ॥ त्वच्चरणांबुजद्वयं तव पादकमलयोर्युग्मं कदा पुनः। कस्मिन्काले मदीयमूर्द्धानं
मदीयशिरोऽलंकरीष्यति भूषयिष्यति ॥ २२ ॥ अथ कुलकं विराजमानेत्यादि पंचदशभिः श्लोकैर्भगवंतं वर्णयति। विराजमानोज्ज्वल

कदा पुनः शंखरथांगकल्पकध्वजारविंदांकुशवज्रलांछनं ॥ त्रिविक्रम त्वच्चरणांबुजद्वयं मदीयमूर्द्धान
मलंकरिष्यति ॥ २२ ॥ विराजमानोज्ज्वलपीतवाससंस्मितातसीसूनसमामलच्छविं निमग्ननाभिं तनुमध्य
कौस्तुभम् मुन्नतं विशालवक्षस्थलशोभिलक्षणं ॥ २४ ॥ पीतवाससं विराजमानं अत्यंतं भासमानं उज्ज्वलं निर्मलं पीतवर्णं वासो

वस्त्रं यस्य स तथोक्तस्तं ॥ स्मितातसीसूनसमामलच्छविं स्मितेन विकसितेन अतसीसूनोपमा कुसुमेन उमा स्यादतसी क्षुमेत्यम
रः। समा समाना अमलानिर्मला छविर्यस्य स तथोक्तस्तं भा छविर्विद्युतिर्दीप्तय इत्यमरः। निमग्ननाभिं निम्ना गंभीरा नाभिर्यस्य स
तथोक्तस्तं ॥ तनुमध्यं तनुः स्वल्पो मध्यो मध्यमभागो यस्य स तथोक्तस्तमुन्नतं अतिदीर्घातिह्रस्वविकृतिरहितं ॥ [illegible] विशा
लवक्षस्थलशोभिलक्षणं विशालं विस्तीर्णं वक्षस्थले उरसि शोभमानं लक्षणं श्रीवत्सनामयस्य स तथोक्तस्तं ॥ २४ ॥ २४ ॥

नं श्रियावतंसोत्पलकर्णभूषणश्लथालकाबंधविमर्दशंसिभिः। श्रिया यादृश्यासंबंधिना भवतंसोत्पलस्य शिरोभूषणानीलोत्प
लस्य कर्णभूषणस्य च श्लथालकानां विश्रस्तालकानां चाबंधस्थानीया या च विमर्द संमर्दः शंसंतीति तथोक्ता स्तैर्ज्याकिणकर्क
शः। ज्यायामौर्व्याः किणः ग्रंथिरूढः कर्कशः कठिनः॥ शुभैर्दीर्घैराजानुविलंबिभिर्जानुपर्यंतं विलंबिनं इति तथोक्तास्तैश्चतुर्भिर्भुजैश्च
कास्ति तं प्रकाशमानं॥ जह्नि जागरिद्राशासदीधीवेवीचकास्तः। तथा अभ्यस्तसंज्ञाः सप्तेने साभ्यासाये च धातवस्ते जक्षित्यादयः।

स

चकास्ति तज्ज्याकिणकर्कशैः शुभैश्चतुर्भिराजानुविलंबिभिर्भुजैः। श्रियावतंसोत्पलकर्ण

भूषणश्लथालकाबंधविमर्दशंसिभिः॥ २५॥ उदग्रपीनांसविलंबिकुंडलालकावली

बंधुरकंबुकंधरं॥ मुखश्रियान्यक्कृतपूर्णनिर्मलाऽमृतांशुबिंबांबुरुहोज्वलश्रियं॥ २६॥

षडितिचकास्तदीक्षाविनिधानो रभ्यस्तसंज्ञायानाभ्यस्तात्‌छत्रु रितिसकारात नित्यत्रनुमागमाभावः॥ २५॥ उदग्रपोरुन्नतयोः
पीनयोरंसयोर्विलंबिनी ये कुंडले ताभ्यामलकावल्या च बंधुरा रम्या कंबुसदृशी कंधरा यस्य तं मुखश्रिया आननशोभया न्यक्कृत
॥ पूर्णनिर्मलाऽमृतांशुः पूर्णविशदश्चंद्रस्य बिंबं मंडलं तस्यांबुरुहस्य

॥ आ. मं. ॥ प्रबुद्धेविकसिते अतएवमुग्धे सुंदरे अंबुजे कमले इव चारुणी मनोहरे लोचने यस्य तं सविभ्रमे सविलासे भ्रूलते यस्य सतथोक्त
मुज्वलाधरम् उज्वलः। प्रकाशमानो धरो यस्य तं शुचिस्मितं शुचि शुद्धं स्मितं मंदहासो यस्य तं कोमलगंडं मृदुकपोलं मुन्नसं तिलकुसुम
॥ ५२ ॥ समं मानं नासं ललाटपर्यंतविलंबितालका यस्य तं थोक्तं ॥२७॥ किरीटमुकुटमंगदं केयूरं हारा मुक्ताहाराः। कटिकाः करमाल्याम
णींद्रः। कौस्तुभः कांचीगुणः। कांचीगुणः। नूपुरमेतेषां द्वंद्वसमासः॥ स्फुरंत्येतान्यादिर्येषां रथांगं चक्रं शंखः। पांचजन्यं असिः

प्रबुद्धमुग्धांबुजचारुलोचनं सविभ्रमभ्रूलतमुज्वलाधरं॥ शुचिस्मितं कोमलगंडमु
न्नसं ललाटपर्यंतविलंबितालकं ॥२७॥ स्फुरत्किरीटांगदहारकंठिकामणींद्रकांचीगु
णनूपुरादिभिः॥ रथांगशंखासिगदाधनुर्वरैर्लसत्तुलस्या वनमालयोज्वलं ॥२८॥

खड्गः गदा। कौमोदकी धनुर्वरं शार्ङ्गमेतेषां द्वंद्वसमासः॥ तैर्लसत्तुलस्या लसती प्रकाशमाना च सा तुलसी च तया तुलसी
मालाया वनमालाया वैजयंतीमालया चोज्वलं रम्यं ॥२८॥ ॥२८॥ ॥२८॥

अथ केन प्रशंसयति॥ यस्याः लक्ष्म्याः त्वं भवतो भुजांतरं भवनं भवनागारमंदिरमित्यमरः। चकर्थ कृतवान् यदीयजन्मभूः यदीयापाः॥
यस्याः लक्ष्म्याः संबंधिनी जन्मभूमिः। क्षीरसमुद्र इत्यर्थः। तव भवतः। प्रियमिष्टं धाम स्थानं समस्तं सर्वं जगद्भुवनं। विष्टपं भुवनं जग
दित्यमरः। यदपांगसंश्रयं यस्याः लक्ष्म्याः अपांगाः कटाक्षाः संश्रय आश्रयो यस्य तत्। यदर्थं यस्याः लक्ष्म्याः अंभोधिः समुद्रः अमथि
मथितः अबंधि बद्धः लुङात्मनेपदम्॥ ३८॥ अथ स्ववैरूप्येण तया सहासीनं निवासस्थानमिति त्रयाणां कुलकम्॥ निवासो निवास

चकर्थ यस्या भवनं भुजांतरं तव प्रियं धाम यदीयजन्मभूः॥ जगत्समस्तं यदपांगसंश्रयं यदर्थमंभोधिर
मंथ्यबंधि च॥ ३९॥ स्ववैश्वरूप्येण सदानुभूतयाप्यपूर्ववद्विस्मयमादधानया॥ गुणेन रूपेण विलासचे
ष्टितैः सदा तवैवोचितया तव श्रिया॥ ४०॥ स्थानं शय्या शयनी पंचशाय्यायां शयनीयमित्यमरः। आसनं च पादुके पाद
त्राणे च। अंशुकं वसनं चैलं वसनमंशुकमित्यमरः॥ उपधानं च वर्षातपयोः वारयतीति वर्षातपवारणं छत्रं चैतान्यादयो येषां
ते तथोक्ताः यथोचितम् उचितमनतिक्रम्य इति यथोचितं तव भवतः॥ शेषतां शेषस्य भावः शेषता तां गतैः प्राप्तैः शरीरभेदैः शरीरं वर्ष्म
विग्रह इत्यमरः॥ शेष इति जनैरीर्यते उच्यते॥ ४१॥ ४२ ॥ ४० ॥ ॥ ४० ॥ ॥ ४० ॥

॥श्री·मं०॥ फणामणिव्रातमयूखमंडलप्रकाशमानोदरदिव्यधामनि ॥ फणासु स्फुटायंतु फणाध्वयोरित्यमरः ॥ मणीनां माणिक्या
दीनां व्रातो निकरः ॥ स्तोमौघनिकरव्रातस्फारसंघातसंचया इत्यमरः ॥ तस्य मयूखाः किरणाः ॥ किरणोस्रमयूखांशुगभस्तिघृणि
॥१२॥ रस्मय इत्यमरः ॥ तस्य मयूखाः किरणास्तेषां मंडलं समूहस्तेन प्रकाशमानं भासमानं उदरं कुक्षिर्येषां पिचिंडकुक्षिजठरोदरं तुंदमित्यमरः ॥
तदेव धाम स्थानं यस्मिंस्तस्मिन्ननंतभोगिनीत्यनंतः शेषइतिभोगीपन्नगः शेषोऽनंतइति उरगः पन्नगो भोगीत्यमरः ॥ तस्मिन्नुत्कृष्ट
तया सहासीनमनंतभोगिनि प्रकृष्टविज्ञानबलैकधामनि ॥ फणामणिव्रातमयूखमंडलप्रकाशमानोदर २८
दिव्यधामनि ॥४९॥ निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिः ॥ शरीरभेदैस्तव शेषतां गतै
र्यथोचितं शेष इतीर्यते जनैः ॥५०॥ विज्ञानबलैकधामनि प्रकृष्टं परमोत्कृष्टं पाड्ज्ञानं बलं च तयोः धाम एकमुख्य
स्थानं तस्मिन् ॥५०॥ स्वैश्वरूपेण स्वस्यात्मनो वैश्वरूपेण विश्वरूपत्वेन सदा सर्वदानुभूतयोपभुक्तयाप्यपूर्ववत् नमिवावि
स्मय माश्चर्य्यं विस्मयोऽद्भुतमाश्चर्य्यमित्यमरः ॥ न्याराधानुयाजनपेत्या सदानुभूतयाप्यपूर्ववत्प्रतीतिरुत्कृष्टा सेवात्कृष्टसौंद
र्य्यमस्तीति प्रतीयते सत्यते ॥ गुणेन सहितेन रूपेण सौंदर्य्यं एवं विलासचेष्टितैश्च सदा संततं तवैव भवतएवोचितया अनुरू
पया नवसंबंधिन्या तया श्रिया नित्यानपायिन्या लक्ष्म्या सहासीनमुपविष्टम ॥४९॥ ५० ॥४२॥ ॥४२॥

अथ गरुत्मता सेव्यमानमित्याह। त्रयीमयः ऋग्यजुः साममयः। इति वेदास्त्रयस्त्रयीत्यमरः। यो गरुत्मान् तेन भवद्दासो भ-
वत्सखा वाहनं आसनं ध्वजः केतुः। वितानमुल्लोचस्त्री वितानमुल्लोच इत्यमरः। व्यजनं तालवृन्तकं व्यजनं तालवृन्तकमित्यमरः।
अभ्रद्विमिशेषः। त्वदंघ्रिसंमर्दकिणाङ्कशोभिना तवांघ्री चरणौ पदंघ्रिश्चरणोऽस्त्रियामित्यमरः। संमर्दनं संघर्षणं किणाङ्क-
केऽस्थिवृद्धिः शोभिना प्रकाशमानेन गरुत्मता पुरः। पुरस्तादुपस्थितं॥ ४४॥ इदानीं विष्वक्सेनसमर्पितपदार्थजातमंगीकुर्वन्तमित्याह॥

दासः सखा वाहनमासनं ध्वजो यस्ते वितानं व्यजनं त्रयीमयः। उपस्थितं तेन पुरो गरुत्मता त्वदंघ्रिसंमर्दकिणाङ्कशोभिना॥४४॥ त्वदीयभुक्तोज्झितशेषभोजिना त्वया निसृष्टात्मभरेण यद्यथा। प्रियेण सेनापतिना न्यवेदि तत्तथानुजानन्तमुदारवीक्षणैः॥४४॥

त्वदीयभुक्तोज्झितशेषभोजिना त्वदीयः स चासौ भुक्तोज्झितो भुक्त्वा विसृष्टः। स चासौ शेषप्रसादस्तं भुंक्ते इति तथोक्तेन। त्वया भवता निसृष्टात्मभरेण निसृष्टो निक्षिप्त आत्मनः स्वस्य भरो भारो यस्मिन् स तेन तथोक्तेन। प्रियेण सेनापतिना विष्वक्सेनेन यद्वस्तु यथा येन केन प्रकारेण निवेदितं तद्वस्तु यथा तेन प्रकारेण उदारवीक्षणैरादा-र्यवत्कटाक्षैरनुजानन्तमंगीकुर्वन्तं॥४५॥ ॥४७॥ ॥४६॥ ॥४४॥

॥ आ० मं०

॥ १४ ॥

इदानीं सचिवैः सेव्यमानमित्याह ॥ स्वभावतो निसर्गा द्धताखिलक्लेशमलैः हता ध्वस्ता अखिलाः समस्ताः क्लेशाः अ
विद्यास्मितारागद्वेषादयः पंचमलीनदोषवासनाये षां तैस्तथोक्तैः रानुकूल्यैकरसैः रानुकूल्याएक मुख्या न्यकेवलं नाद्दत्यमाः
रसा भगवदनुभवानंदरसो येषां तैस्तथोक्तैस्तवभवत उचितैरनुरूपैः गृहीते तत्परिचारसाधनैः गृहीतानि स्वीकृतानि तत्परि
चाराणां तत्तत्कैंकर्यधर्माणां साधनानि छत्रचामरव्यजनादीनि यैस्तैस्तथोक्तैः ॥ सचिवैरमात्यैर्यथोचितं प्रचितमननिक्रम्य

हताखिलक्लेशमलैः स्वभावतं सदानुकूल्यैकरसैस्तवोचितैः ॥ गृहीततत्परिचारसाधनैर्निसेव्यमा
नं सचिवैर्यथोचितं ॥ ४५ ॥ अपूर्वनानारसभावनिर्भरप्रबुद्धया मुग्धविदग्धलीलया ॥ क्षणाणुवत्क्षिप्त
पराद्दिकालया प्रहर्षयंतं महिषीं महाभुजं ॥ ४६ ॥ सदा संततं निषेव्यमाणं नितरां सेव्यमानं सम्यक्सेव्यमानमित्यर्थः

इदानीं लक्ष्मीमानंदयतीत्याह ॥ अपूर्वा नित्यं यो नूतनाः ॥ नानानानाविधा रसाः शृंगाराद्यपश्च भावाः ॥ विलासादिभावाश्च
तैर्निर्भरा पूर्णा पूर्णं नम्रबुद्धपरिविकसितया क्षणास्तेवत्क्षिप्तपराद्दिकालयाक्षणस्य क्षणमात्रस्य अणुवत्क्षिप्तायापिताः
पराद्दिकाः कोत्र ब्रह्माद्दिकालो यस्यास्तया तथोक्तया मुग्धविदग्धलीलया मुग्धा सुंदरा मुग्धः सुंदरमत्यौ यो रित्यमाः ॥ साच
विदग्धा निपुणा चेसा च लीला क्रीडा च तया महिषी कृताभिषेका महालक्ष्मीः कृताभिषेका महिषीत्यमरः ॥ प्रहर्षयन् संतो

षयन्नु महाभुजं महान्तो भुजा यस्य तं ॥ ४६ ॥ तथोक्तं ॥ ४६ ॥

अचिंत्यदिव्याद्भुतनित्ययौवनं स्वभाव लावण्यमयामृतोदधिं ॥ अचिंत्यं चतद्दिव्यं चाद्भुतं च तच्च तत् नित्यं च तत्तच्च तत्तद्यौवनं च स्वभावेन लावण्यमयः सुधासाद्वमृतोदधिः तीरसमुद्रश्च यस्य तं तथोक्तं श्रियो लक्ष्म्याः । श्रियं शोभां भक्तजनैकजीवितं भक्ताश्च ते जनाश्च भक्तजनास्तेषामेकं मुख्यं जीवितं प्राणसमानं समर्थं दत्तमापत्सु रक्षा आपत्काल बांधवं । अर्थिकल्पकं अर्थिनां याचकानां कल्पकं कल्पवृक्षं ॥ ४७ ॥ भवि राजमाने त्वां हृदि एतावत्पर्यंतं विशेषणानुक्त्वा इदानीं विशेष्य दर्शयन् क्रियापदेन सूचयति ॥ भवंतमेव विराजमानं त्वामादि श्लोकोक्तविशेष्यं विशिष्टं त्वामेवानुचरन्नेव सेव्यमानं निरंतरं प्रशांतनिःशेषमनो

२ भवंतमेवानुचरन्निरंतरः प्रशांतनिःशेषमनोरथांतरः । कदाहमैकांतिकनित्यकिंकरः प्रहर्षयिष्यामि सनाथ

जीवितं ॥ ४८ ॥ अचिंत्यदिव्याद्भुतनित्ययौवनं स्वभावलावण्यमयामृतोदधिं । श्रियः श्रियं भक्तजनैकजीवितं ॥

प समर्थमापत्सखमर्थिकल्पकं ॥ ४७ ॥ रथांतरः । निरंतरं संततं प्रशांतानि निर्गतानि निःशेषाणि समस्तानि मनोरथांतराणि

वांछांतराणि यस्य स तथोक्तः ॥ वांछा लिप्सा मनोरथस्त्वमरः । एकांतसंबंधी नित्यः । किंकरः कैंकर्यपरोहं सनाथजीवितं सनाथं स्वा

मिसहितं ॥ जीवनं कर्मंदाकस्मिन्काले प्रहर्षयिष्यामि संतोषयिष्यामि ॥ ४८ ॥ ॥ ४८ ॥ ॥ ४८ ॥

क

॥ स्त्रा॰ मं॰ ॥ बुद्ध्याशंकराद्रिर्मिथ्यातुमद्वाक्यं तवसेवकत्वंप्रार्थयमानोहंमृषीइतियामुनाचार्य्यः ॥ आत्मानंनिंदयति हे परमपुरुषसर्वोत्तम
योहंकामवृत्तः स्वेच्छासंचारीभूत्वायोगिवर्याग्रगण्यैः । योगीवर्याणांयोगिश्रेष्ठानां अग्रगण्यैः । गणनीयैर्विधिशिवसनकाद्यैः । वि
॥ २५ ॥ धिश्च शिवश्च सनकश्चादयोयेषांतेस्तथोक्तैः ध्यातुंचिंतितुंअत्यंतदूरंतवभवतःपरिजनभावंपरिजनस्यदासस्यभावस्तंतथोक्तंके
कर्यमित्यर्थः कामयेइच्छामि अशुचिमस्पृश्यं अविनीतंविनयरहितं । निर्दयंदयाहीनं । अलज्जं लज्जारहितंमांधिक् ॥ ४९ ॥ अथा

धिगशुचिमविनीतंनिर्दयंमामलज्जंपरमपुरुषयोहंयोगिवर्याग्रगण्यैः । विधिशिवसनकाद्यैर्ध्यातुमत्यंत
दूरंतवपरिजनभावंकामयेकामवृत्तः । ४९ ॥ अपराधसहस्रभाजनंपतितंभीमभवार्णवोदरे । अगतिंशरण
गतंहरेकृपयाकेवलमात्मसात्कुरु ॥ ५० ॥ नन्यागतिकं अपराधिनं संसारसागरपतितंमां त्वदधीनंमांत्वदधीनंकुर्वितिविज्ञा
पयति हे हरे अपराधसहस्रभाजनं । अपराधानांसहस्रभाजनंस्थानंभीमभवार्णवोदरे । भीमस्यभयंकरस्यभवार्णवस्यसंसारसा
गरस्योदरेमध्येपतितमगतिंगतिरहितंशरणागतंमांकेवलंकृपयादया आत्मसात्वदधीनंकुरुष्व ॥ ५० ॥ ॥ ५० ॥

पा

नविद्यंते ऽच्युतनाभक्ताः सोऽच्युतः तस्य संबुद्धिः । हे ऽच्युत हे भगवन् षड्गुणैः । परिपूर्ण । अविवेकघनांधदिङ्मुखे अविवेकः सदस
द्विस्तानाभावः स एव घनो मेघस्तेनांधानि जिरावृतानि दिङ्मुखानि यस्मिंस्तथोक्तं तस्मिन् बहुधा अनेकधा संततदुःखवर्षिणि
संततं निरंतरं दुःखं वर्षयतीति तथोक्तं । तस्मिन् भवदुर्दिने भवः । संसार एव दुर्दिनं तस्मिन् पथो मार्गात् स्खलितं अच्युतं मामवलो
कय पपस्य ॥५१॥ हे नाथ स्वामिन् मया ना वद्धं किंतु परमार्थमेव यथार्थमेव अग्रतः । पुरस्तात् सन्निधावित्यर्थः एकं मम विज्ञापनं

अविवेकघनांधदिङ्मुखे बहुधा संततदुःखवर्षिणि ॥ भगवन् भवदुर्दिने पथः स्खलितं मामवलोकया
च्युत ॥५१॥ न मृषा परमार्थमेव मे शृणु विज्ञापनमेकमग्रतः ॥ यदि मे न दयिष्यसे ततो दयनीयस्तव ना
थ दुर्लभः ॥५२॥

शृणु आकर्णय मे मम यदि न दयिष्यसे यदि नानुकंपयसे यदि ततो दयाविसर्जनानंतरं तव भवतो दयनीयो दयाकारणयोग्यो दुर्लभः
दुःप्राप्यो नास्तीत्यर्थः ॥ प्रभोस्त्वं तद्दीनरक्षणमेव परमधर्मो अतोऽत्यंतदीनत्वान्मद्रक्षणमेव कर्तव्यमित्यर्थः ॥५२॥ ॥५२॥

५२॥ ॥५२॥ ॥५२॥ ॥५२॥ ॥५२॥

॥आ॰ मे॰॥ हे भगवन् षड्गुणैश्वर्यसंपन्न। तत्तस्माद्दयनीयाभावात्॥ अहं त्वदृते त्वां विना नाथवान् न। त्वं च मदृते मां विना दयनीयवान् न॥ एत
दन्वयमेतयोः स्वामिभृत्ययोरन्वयं संबंधं यथाविधि निर्मितं विधिना ब्रह्मणा निर्मितं। तथोक्तं संहारकस्रष्टिरूपेण त्वया निर्मितमि
॥२६॥ त्यर्थः पालय रक्ष यमा स्म जीहपः न त्यज॥५१॥ इदानीमात्मानं समर्पणं करोति। हे वैकुंठ त्वय्याहार्यं। अहं वपुरादिषु वपुः शरीर
मादिर्येषां तेषु वपुरादिषु यो पि को पि वा गुणतो गुणवशाद्यथा तथाविधोऽसानि भवानि। असभुवीति धातोर्लोडुत्तमपुरुषैकव

तदहं त्वदृते न नाथवान्मदृते त्वं दयनीयवान्न च। विधिनिर्मितमेतदन्वयं भगवन्पा
लय मा स्म जीहपः॥५१॥ वपुरादिषु यो पि को पि वा गुणतोऽसानि यथा तथाविधः। तदहं
तव पादपद्मयोरहमद्यैव मया समर्पितः॥५२॥ ॥५२॥ ॥५२॥ ॥५२॥

चनं मे निरीति निनिरासंस्रा:। तत्तस्मात्कारणात् अहं तव भगवन्। पादपद्मयोः पादारविंदयोरद्यैव मया समर्पितः॥५२॥ ॥५२॥

इदांनीसर्वेश्वरस्यनियंतुःअखंडपरिपूर्णस्यश्रियःपतेरहंकिंसमर्पयामीतिविज्ञापयति।हेनाथस्वामिन्माधवलक्ष्मीपतेमम
यद्वस्तुयच्चाहंयोस्मितत्सकलंसर्वंतवैववहित्वदीयमेवखलुनियतंस्वाधीनंनियतस्वंधनमितिप्रबुद्धधीःविकसितबुद्धिःत्वद
कनिष्ठुतानवानहमित्यर्थः।अथवातेभवतःकिंतुकिंचिद्वस्तुसमर्पयामिकिमपिसमर्पयन्नहंनकर्तास्मीत्यर्थः।यथातांबू
लकरंडकधारीराज्ञेराजस्वमेवतांबूलंसमर्पयन्नतद्दातेतिभावः॥५५॥इदानींममभक्तिंदातव्येतिज्ञापयति।हेभगवन्ज्ञानादि

ममनाथयदस्तियोस्म्यहंसकलंतद्धितवैवमाधव॥नियतस्वमितिप्रबुद्धधीरथवाकिंनुसमर्पयामि
ते॥५५॥अवबोधितवानिमांयथामयिनित्यांभवदीयतांस्वयं॥कृपयैवमनन्यभोग्यतांभगवन्भक्तिमपि

॥प्रयच्छमे॥५६॥

सकलगुणसंपन्नमयिनित्यामिमांभवदीयतांयुष्मदधीनतांयथायथार्थंस्वयंत्वंअवबोधितवान्ज्ञापितवान्कृपयाकारु
ण्यात्परत्यानुकंपास्यादित्यमरः।एवमनेनप्रकारेणानन्यभोग्यतामन्यभोगानर्हतांभक्तिमपिमेममप्रयच्छप्रसादयेत्यर्थः॥५६॥

५६॥ ॥५६॥ ॥५६॥ ॥५६॥ ॥५६॥

॥ श्री॰ मं॰ ॥ इदानीं उत्तरोत्तरजन्मांतरे मम भवद्दासगृहे कीटजन्मापि श्रेष्ठमितरस्थानेषु ब्रह्मजन्मापि मास्त्वित्याह । हे केशवाद्युत्पत्यर्थ्यां ग
तवभवतः । दास्यसुखैकसंगिनां दास्यैकं कैंकर्यं सुखमेव केवलं मुख्या संयोगो येषां तेन तथोक्तास्तेषां भवनेषु मंदिरेषु मम कीटज
॥ ७ ॥ न्मापि अस्तु भवतु इतरावसथेषितरेषां त्वद्भक्तिरहितानां आवसथेषु गृहेषु तु भिर्वि मृग्याभिमिति ॥ ५७ ॥ यावसथसंस्त्यायनिका
याः इत्यमरः । चतुर्मुखात्मना चतुर्मुखस्य ब्रह्मणः आत्मना स्वरूपेणापि मम मज्जन्म मा स्म भूत् नाभवतु नमाऽस्त्वि गृहे इति प्रति
षेधात् अडागमाभावः । श्रीविष्णुभक्तपादरेणुस्पर्शयुक्तान्मलतादिजन्मापि श्रेष्ठमित्याह । श्रीभागवते दशमस्कंधे ॥ आ

तव दास्यसुखैकसंगिनां भवनेष्वस्त्वपि कीटजन्म मे । इतरावसथेषु मा स्म भूदपि मे जन्म चतुर्मुखात्मना ॥ ५७ ॥
सकृत्त्वदाकारविलोकनाशया तृणीकृतानुत्तमभुक्तिमुक्तिभिः ॥ महात्मभिर्मामवलोकतां नय क्षणेपि ते य
द्विरहोतिदुःसहः ॥ ५८ ॥ आसामहो चरणरेणुजुषामहं स्यां वृंदावने किमपि गुल्मलतौषधीनां ॥ या दुस्त्यजं स्वजनमार्यप
थं च हित्वा भेजुर्मुकुंदपदवीं श्रुतिभिर्विमृग्यां परमभागवतरूपादृष्टिमेयिप्रवर्तनामित्याह ॥ हे गोविंद इत्यध्याहार्यं । सकृदेक
वारं त्वदाकारविलोकनाशयालवभवत आकारस्य दिव्यमंगलविग्रहस्य विलोकने दर्शने आशया इच्छया तृणीकृतानुत्तम
भुक्तिमुक्तिभिः ॥ तृणीकृता अनुत्तमाः निःश्रेष्ठा भुक्तिश्च मुक्तिश्च यैस्ते तथोक्तास्तैर्महात्मभिर्महानुभावैर्मामवलोकतां नय
प्रापय ॥ यद्विरहो येषां महात्मनां विरहो वियोग ॥ क्षणेपि क्षणमात्रेपि तेभवतो ऽतिदुःसहो ऽत्यंतं सोढुमशक्यः ॥ ५८ ॥

इदानीं परमविरक्तस्य । श्रीविष्णुशेषत्वविभवादन्यं नेच्छामीत्याह ॥ हे नाथ हे स्वामिन् तव भवतः । शेषत्वस्य विभवात् महोत्सवात्
बहिर्भूतं देहं शरीरं न सहे प्राणान्न सहे सुखं च न सहे अशेषाभिलषितमशेषाश्च तदभिलषितं च तथा किंचन सहे आत्मानं च न स
हे अन्यदतिरिक्तं किमपि तृणं तृणमात्रमपि न सहे ननु इहादि वस्तुभावं ज्ञातधा ज्ञातविधमिन्नं विना संनाशानं यातु गच्छतु हेम
धुमथन मधुर्नामकश्छिद्रद्रावकस्तं मन्यातीमिनथोक्तः ॥ तस्य मं बुद्धिर्मधुपथनस्य तव देहादि ज्ञातथाकरणं नप्रयासमन्निभावः
मादृग्विधमिदं विज्ञापनं सत्यं तथ्यं सत्यं तथ्यमृतं सम्यगित्यमरः ॥५६॥ इदानीमाचारहीनोऽपि ज्ञानहीनोऽपि सर्वाशुभनिवासो

न देहं न प्राणान्न च सुखमशेषाभिलषितं न चात्मानं नान्यत्त्वत्किमपि शेषत्वविभवात् ॥ बहिर्भूतं नाथ क्षण
मपि सहे यातु शतधा विनाशं तत्सत्यं मधुमथन विज्ञापनमिदं ॥५६॥ दुरन्तस्यानादेरपरिहरणीयस्य महतो
विहीनाचारोऽहं नृपशुरशुभस्यास्पदमपि ॥ दयासिंधो बंधो निरवधिकवात्सल्यजलधे तव स्मारं स्मारं गुण
गणमितीच्छामि गतभीः ॥५७॥ अहमानंदवात्सल्यसमुद्रस्य निरुपाधिकबंधोस्तव गुणगणं स्मृत्वा विगतभयोऽस्मि स्वा

मीति विज्ञापयति हे दयासिंधो दयासमुद्र विहीनाचारः विगत आचारो यस्य स तथोक्तः । नृपशुर्मनुष्यपशुः । दुरन्तस्य अनंत
स्य दुःखांतस्येति वा अनादेरादिरहितस्य परिहरणीयस्य परिहर्तुमशक्यस्य महतोऽधिकस्य अशुभस्य अमंगलस्य आस्पदम
पि निवासोऽप्यास्पदमित्यनियतनपुंसकं ॥ अहं बंधो परमबंधो निरवधिकवात्सल्यजलधे अपारवात्सल्यसमुद्रस्य तव गुणगण

॥ श्री॰ मं श्री इदानीं त्वमेव दयया मे मनः शिक्षयेति ॥ हरिं विज्ञापयति ॥ हे धरणीधर भूधर अहमित्यध्याहार्यं ॥ एवं पूर्वोक्तप्रकारेण ॥ अनिच्छ
॥१८॥ न्नप्येवं अन्यापि पुनरपीच्छन्निव रजस्तमश्च नच्छद्मस्तुति वचनभंगी रजश्च तमश्च रजस्तमसी गुणौ ताभ्यां अच्छन्नमाच्छादितं व
नच्छद्मकैतवं वंचकपटोस्त्रीत्यामरः दंभोपधयश्छद्मकैतवं स्यादमरः ॥ तेन स्तुति वचनानां स्तोत्रवाक्यानां भंगीप्रकारमस्वयं पावि

अनिच्छन्नप्येवं यदि पुनरपीच्छन्निव रजस्तमश्छन्नं छद्मस्तुतिवच
नभंगीमस्वयं ॥ तथापीत्थंरूपं वचनमवलंब्यापि इत्थंरूपया त्वमेवैवंभू
तं धरणीधर मे शिक्षय मनः ॥६॥ ॥६॥ ॥६॥ ॥६॥

तवानस्मि तथाप्येवमपीत्थंरूपमपि पूर्वोक्तदोषमापि वचनं वाक्यमवलंब्य परिगृह्य रूपया दयया त्वमेवैवंभूतं गुणविकलं मेम
मनः ॥ शिक्षय सात्विकं कुर्वित्यर्थः ॥६॥ ॥६॥ ॥६॥ ॥६॥ ॥६॥ ॥६॥

ह्वानीभगवानेव सकलविधबंधुरित्याह। हे पद्मनाभ त्वमाहार्य्यं जगतां भुवनानां विश्वंभुवनं जगदित्यमरः॥ त्वं पिता जनकः। तात
स्तु जनकः पितेत्यमरः। त्वं माता जननी। त्वं दयिततनयः। दयितश्चासौ तनयश्च प्रियपुत्र इत्यर्थः। त्वमेव प्रियसुहृत् त्वं मित्रं गुरुराचार्यो
पि गतिश्चासि हे त्वदीयस्त्वत्संबंधित्वद्भृत्यस्तवपोष्यस्तवभवतः। परिजनः सेवकस्त्वद्गतिः। त्वमेव गतिर्यस्य मम तथोक्तः प्रपन्नश्च श

पिता त्वं माता त्वं दयिततनयस्त्वं प्रियसुहृत्त्वमेव त्वं मित्रं गुरुरपि गति
श्चासि जगताम्। त्वदीयस्त्वद्भृत्यस्तव परिजनस्त्वद्गतिरहं प्रपन्नश्चैवं
सत्यहमपि तवैवास्मि हि भरः॥ ६२॥ ॥६२॥ ॥६२॥ ॥६२॥

रणागतश्चैवं सत्यहमपि तवैव भवत एव भरो भारोस्मिन्न्यस्तभरस्समे जननीजनकादिवात्त्वमेवरक्षक इत्यर्थः॥ अस्मिन्भारोह
मित्यस्माद्धि द्वयस्य वाक्यभेदात्पुनरुक्तशंका न कर्त्तव्या॥ ६२॥ ॥६२॥ ॥६२॥ ॥६२॥ ॥६२॥

॥ श्या. स. ॥ हे शरण्य दहे दरे ॥ अहं जगति ख्यातयशसां प्रशस्तकीर्तिनां शुचीनां निर्मलांतःकरणानां युक्तानामात्मविद्यानुसंधानयोगमार्गप्रव
त्तानां गुणपुरुषतत्त्वस्थितिविदां गुणाः सत्वरजस्तमांसि पुरुषं हे चच्चं तेष्वज्ञ आत्मा पुरुषस्त्वपरः ॥ तत्त्वानि षड्विंशति तत्त्वानि भ
॥ १९ ॥ गवद्गीतासूक्तानि महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ॥ इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥ आत्मा चईश्वरश्चैत्येवं संभूपष

जनित्वाहं वंशे महति जगति ख्यातयशसां शुचीनां युक्तानां गुणपुरुषतत्त्वस्थितिवि
दाम् ॥ निसर्गादेव त्वच्चरणकमलैकांतमनसामधोधः पापात्मा शरणद निमज्जामि त
॥ इश्मसि ॥ ६३ ॥

ड्विंशतितत्त्वानि तेषां द्वंद्वसमासः तेषां स्थितिं रूपं विदंतीति तथोक्तास्तेषां निसर्गादेव स्वभावादेव त्वच्चरणकमलैकांतमन
सां तव भवतश्चरणावेव कमले तयोरेकांतमनः अभिचारि मनो येषां ते तथोक्तास्तेषां महत्सु त्वस्ते वंशे कुले जनित्वा पापात्मा सन्
अधोधस्तमस्यज्ञानेन निमज्जामि निमग्नोस्मि ॥ ६३ ॥ ॥ ६३ ॥ ॥ ६३ ॥ ॥ ६३ ॥ ॥ ६३ ॥

हे जनार्दन त्वया दार्यं अमर्यादो मर्यादारहितः। क्षुद्रोऽल्पश्चलमतिश्चंचलबुद्धिरसूयाप्रसभूरसूया परगुणेषु दोषारोपो हंतिते
र्ष्यायाः सूयानुदोषारोपो गुणेष्वपीत्यमरः। तस्याः प्रसवस्योत्पत्तेः भूः स्थानं कृतघ्नः कृतं परकृतोपकारं हंतीति कृतघ्नः। दुर्मानी दुर
हंकारी स्मरपरवशः कामपरतंत्रः। वंचनपरः वंचने परप्रतारणे परो निरतः। नृशंसः क्रूरः। नृशंसो घातकः क्रूरस्त्यमरः। पापिष्ठः। पा
पकर्मा कथं केन प्रकारेण अपारादनंतादीदृशात् दुःखजलधेः संसाररूपदुःखसमुद्रादुत्तीर्णः केनप्रकारेणापि नोत्तीर्ण इत्यर्थः। किं

अमर्यादः क्षुद्रश्चलमतिरसूयाप्रसवभूः कृतघ्नो दुर्मानी स्मरपरवशो वंचनपरः। नृशंसः पापिष्ठः कथमहमि
तो दुःखजलधेरपारादुत्तीर्णस्तव परिचरेयं चरणयोः ॥६४॥ रघुवर यदभूस्त्वं तादृशो वायसस्य प्रणत इति द
यालुर्यस्य चैद्यस्य कृष्ण। प्रतिभवमपराद्धुर्मुग्ध सायुज्यदोऽभूर्वद किमपदमागस्तस्य तेऽस्ति क्षमायाः ॥६५॥

तु नवभवनश्चरणयोः पादयोः परिचरेयं परिचर्यापरो भवेयं॥ लङ् उत्तमपुरुषैकवचनं ॥६४॥ हे रघुवर रामचंद्र यदित्यव्ययं इत्यर्थः॥
मत्त त्वं तादृशस्तादृशस्य महापराधिनो वायसस्य काकस्य प्रणत इति हेतोर्दयालुरभूः हे मुग्ध सुंदररूप स्य प्रतिभव प्रतिजन्म हिरण्यकहि
रण्यकशिपुरावणकुंभकर्णशिशुपालदंतवक्त्रेष्वित्यर्थः। अपराद्धुरपराधकारिणश्चैद्यस्य शिशुपालस्य सायुज्यदो मोक्षप्रदायकोऽभूः
भव॥ आगस्तस्य ते क्षमायाः अंतरं पदं स्थानं मा आगोऽपराधः किमस्ति वद। शिशुपालस्यापि मोक्षप्रदायकस्त्वं ममापराधं किमर्थं न क्षमसीत्यर्थः ॥६५॥

॥ श्री॰ मं॰ ॥ हे नाथ हे स्वामिन् तवाहमस्मीति त्वद्दासोऽस्मीति चेत्यर्थः। याचमानः। प्रार्थयानः सकृदेव प्रपन्नो ननु शरणागतः। स्वभक्तप्रति
ज्ञां स्मरत स्तवानुकंप्योऽस्य नीयस्तीयं प्रतीज्ञा श्रीरामायणे विभीषणरक्षणसमुपेतश्चोक्तं। आनयैनं हरिश्रेष्ठ दत्तमस्याभयं
॥ २०॥ वौ मया। विभीषणो वा सुग्रीव यदि वा रावणः स्वयं। सकृदेव प्रपन्नाय तवास्मीति च याचते। अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम। इत्येवं
चेसति। मदेकवर्जं महं चासावेकश्च मदेकस्तस्य वर्जनं मदेकवर्जनमित्यर्थः। इदं नेहतं किं सर्वानप्रपन्नानपि पाल्यमामेकम्

ननु प्रपन्नः सकृदेव नाथ तवाहमस्मीति च याचमानः। तवानुकंप्यः स्मरतः प्रतिज्ञां मदे
कवर्जं किमिदं व्रतं ते ॥ ६६ ॥ अहह तु मन्त्वच्चरणारविंदप्रेमप्रकर्षावधिमात्मवंतं। पितामं
हं नाथमुनिं विलोक्य प्रसीद मद्वृत्तमचिन्तयित्वा ॥ ६७ ॥ ॥ ६७ ॥ ॥ ६७ ॥ ॥ ६७ ॥

पेक्षितं तव नयुक्तमिति भावः ॥ ६६ ॥ हे अस्तु तमनि स्फुटत्वच्चरणारविंदप्रेमप्रकर्षावधितत्त्वच्चरणारविंदयोः पादपद्मयोः प्रे
मप्रकर्षस्य प्रेमोत्कर्षस्यावधिमात्मवंतं ॥ ज्ञानिनं पितामहं नाथमुनिं नाथमुनिनामकं मुनिं विलोक्य वीक्ष्य मद्वृत्तिं मच्चरितमचिं
॥ तयित्वा अविचार्य प्रसीद प्रसन्नो भव ॥ ६७ ॥ ६७ ॥

आ॰ मं॰ ॥२१॥

इदानीं यामुनमुनिं नमस्करोति ॥ यत्पादांभोरुहध्यानविध्वस्ताशेषकिल्विषः ॥ यस्य यामुनाचार्यस्य पादांभोरुहयोः पादकमलयोर्ध्यानेन विध्वस्तानि विनाशितान्यशेषाणि समस्तानि कल्मषाणि पापानि यस्य स तथोक्तः । वस्तुतामुपयातो

यत्पादांभोरुहध्यानविध्वस्ताशेषकिल्विषः ॥ वस्तुतामुपयातोहं
यामुनेयं नमामि तं ॥६८॥ इति श्रीयामुनाचार्यविरचितं आलमंदारस्तोत्रं संपूर्णं ॥

हं येतामुपयातः ॥ प्राप्तोहं तं यामुनेयं यामुनाचार्यं नमामि वंदे ॥६८॥ इति श्रीआलमंदारमूलव्याख्यानं समाप्तम् ॥
संवत ॥१९२८॥ श्रीः ॥ ❋ ॥श्रीः ॥ ❋ ॥श्रीः ॥ श्रीरस्तु ॥

1060